CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 169

Title Tarkasangrahadipika

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 169 Subject : Nyāya

Title : Tarkasaṅgraha dīpikā

Author : Madanna Bhatta Scribe : Bhāṅgrṣikeśa Padhyāya

Date of the work : — Date of the Ms. : V.S. 1785

Place of the work : — Place of the Ms. : —

Size : 10.3" by 4.5" Extent : 19 with 1 to 18 missing

Language : Sanskrit. Script : Devanāgarī

Remarks : Incomplete. nos. 14 to 18 missing. Perhaps it has continuity.

१

तर्कसंग्रहदीपिकासंपूर्णपत्र१४
पुस्तकत्र।नाणजीनुं छे

र्ति

श्रीगणेशाय नमः ॥ ॥ विश्वेश्वरं साम्बमूर्तिं प्रणिपत्य गिरं गुरुम् ॥ टीकां शिशुहितां कुर्वे तर्कसंग्रहदीपिकाम् ॥१॥ चि
कीर्षितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकम् इष्टदेवतानमस्काररूपं मङ्ग
लं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नंश्चिकीर्षितं प्रतिजानीते । निधायेति । ननु मङ्गलस्य समाप्तिसाधनत्वं नास्ति । मङ्गले कृ
तेऽपि किरणावल्यादौ समाप्त्यदर्शनात् । मङ्गलाभावेऽपि कादम्बर्यादौ समाप्तिदर्शनात् । इत्यन्वयव्यतिरे
कव्यभिचारादिति चेन्न ॥ किरणावल्यादौ विघ्नबाहुल्यात् समाप्त्यभावः । कादम्बर्यादौ ग्रन्थाद्बहिरेव मङ्गलस्य कृ
तत्वेन न व्यभिचारः । ननु मङ्गलस्य कर्तव्यत्वे किं प्रमाणमिति चेन्न ॥ शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात् । तथा
हि । मङ्गलं श्रुतिबोधितकर्तव्यताकम् अलौकिकाविगीतशिष्टाचारविषयत्वात् दर्शवत् । भोजनादौ व्यभिचा
रवारणाय अलौकिकेति । रात्रिश्राद्धादौ व्यभिचारवारणाय अविगीतेति । शिष्टपदं स्पष्टार्थम् । न कुर्यान्निष्फ
लं कर्मेति जलताडनादेरपि निषिद्धत्वात् ॥ तर्क्यन्ते प्रतिपाद्यन्त इति तर्का द्रव्यादिपदार्थाः । तेषां संग्रहः संक्षे
पेण स्वरूपकथनं क्रियत इत्यर्थः । कस्मै प्रयोजनायेत्यत आह । सुखेति । सुखेन अनायासेन बोधः । पदा
र्थज्ञानं तस्मै इत्यर्थः । ननु बहुषु तर्कग्रन्थेषु सत्सु किमर्थमपूर्वग्रन्थः क्रियत इत्यत आह । बालानामिति । ते
षामतिविस्तृतत्वात् बालानां बोधनं न संभवत्येवेत्यर्थः । ग्रन्थग्रहणधारणापटुर्बालः न तु स्तनन्धयः । किं
कृत्वा इत्यत आह । निधायेति । विश्वेश्वरं जगन्नियन्तारं साम्बं शिवं हृदि निधाय नितरां स्थापयित्वा सर्वदा त १

ध्यानपरो भूत्वेत्यर्थः । गुरूणां विद्यागुरूणां वन्दनं नमस्कारं विधाय कृत्वा पदार्थान् विभजन्ते । द्रव्येति । पदस्य
अर्थः पदार्थ इति व्युत्पत्त्या अभिधेयत्वं पदार्थसामान्यलक्षणं लभ्यते । ननु विभागादेव सप्तत्वे सिद्धे सप्तग्रहणं
व्यर्थमिति चेन्न । अधिकसंख्याव्यवच्छेदार्थत्वात् । नन्वतिरिक्तः पदार्थः प्रमितो न वा । नाद्यः । प्रमितस्य प्रतिषेधा न२
योगात् । न द्वितीयः । प्रतियोगिप्रमितिं विना निषेधानुपपत्तेरिति चेन्न । पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमि
ति व्यवच्छेदार्थत्वात् । द्रव्याणि विभजते । तत्र द्रव्याणि । पृथ्वीति । ननु तमसो दशमद्रव्यस्य विद्यमानत्वात् कथं नव
द्रव्याणि । तथाहि । नीलं तमश्चलति ननु सप्तान्यतमत्वं सप्तभिन्नभिन्नत्वमिति वक्तव्यम् । एवं च सप्तभिन्नस्याप्रसिद्धत्वा
त् सप्तान्यतमत्वं कथमिति चेन्न । द्रव्यादिसप्तान्यतमत्वं द्रव्यादिसप्तसप्तकाभाववत्त्वमित्युक्तत्वात् । एवमग्रेऽपि द्रष्टव्यं । भेद३
द्रव्याणि विभजते । तत्र द्रव्याणि । पृथ्वीति । ननु तमसो दशमद्रव्यस्य विद्यमानत्वात् कथं नव द्रव्याणि । तथाहि ॥
नीलं तमश्चलतीत्यबाधितप्रतीतिबलात् नीलरूपाधारतया क्रियाधारतया च द्रव्यत्वं तावत् सिद्धम् । तच्च तमसो ना
काशादिपञ्चकेऽन्तर्भावः रूपवत्त्वात् । अत एव न वायौ सदागतिमत्त्वाभावाच्च । नापि तेजसि भास्वररूपाभावा
दुष्णस्पर्शरहितत्वाच्च । नापि जले शीतस्पर्शाभावान्नीलरूपाश्रयत्वाच्च । नापि पृथिव्यां गन्धाभावात् स्पर्शरहितत्वा
च्च । तस्मात् तमो दशमं द्रव्यमिति चेन्न । तमसस्तेजोऽभावरूपत्वात् । तथाहि । तमो न रूपवद्द्रव्यम् आलोकासह
कृतचक्षुर्ग्राह्यत्वात् । आलोकाभाववत् । रूपिचाक्षुषप्रमायामालोकस्य कारणत्वात् । तस्मात् प्रौढप्रकाशक

तेजःसामान्याभाववत्त्वमः।तत्रनीलंतमश्चलतीतिप्रत्ययोभ्रमः।अतोनवद्रव्याणीतिसिद्धं।द्रव्यत्वजातिम
त्त्वंगुणवत्त्वंवाद्रव्यसामान्यलक्षणं।लक्ष्यैकदेशावृत्तित्वमव्याप्तिः।यथागोःकपिलत्वं।अलक्ष्यवृत्तित्वमति
व्याप्तिः।यथागोःशृंगित्वं।लक्ष्यमात्रावर्तनमसंभवः।यथागोरेकशफवत्त्वं।एतद्दूषणत्रयरहितोधर्मोलक्ष
णं।सएवासाधारणधर्मइत्युच्यते।लक्ष्यतावच्छेदकसमनियतत्वमसाधारणत्वं।व्यावर्तकस्यैवलक्षणत्वे
नवि व्यावर्त्यानिधेयत्वादौअतिव्याप्तिवारणायतद्भिन्नत्वंधर्मविशेषणंदेयं।व्यवहारस्यापिलक्षणप्रयोजकत्वेनदेयं।
व्यावृत्तेरपिव्यवहारसाधनत्वात्।ननुगुणवत्त्वंद्रव्यलक्षणं।आद्यक्षणेउत्पन्नविनष्टद्रव्येचाव्याप्तिरितिचेन्न।
गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्यविवक्षितत्वात्।ननुएवमपिएकंरूपंरसात्पृथगितिव्यवहारात्प्र
बा५ पादौअतिव्याप्तिरितिचेन्न।एकार्थसमवायादेवतादृशव्यवहारोपपत्तौगुणेगुणानंगीकारात्।गुणंविभजते।रू
पेति।द्रव्यकर्मभिन्नत्वेसतिसामान्यवान्गुणः।गुणत्वजातिमान्वा॥ननुलघुत्वमृदुत्वकठिनत्वादीनां
विद्यमानत्वात्कथंचतुर्विंशतिगुणाइतिचेन्न।लघुत्वस्यगुरुत्वाभावरूपत्वात्मृदुत्वकठिनत्वयोःअवयव २
संयोगविशेषरूपत्वात्।कर्मविभजते।उत्क्षेपणेति।संयोगभिन्नत्वेसतिसंयोगासमवायिकारणंकर्म।कर्म
त्वजातिमद्वा।भ्रमणादीनामपिगमनेंतर्भावात्नपंचत्वविरोधः।सामान्यंविभजतेपरमिति।परमधिकदेश
वृत्ति।अन्यूनदेशवृत्तिसामान्यादिचतुष्टयेजातिर्नास्ति।विशेषंविभजते।नित्येति।पृथिव्यादिचतुष्टयस्य
परं

परमाणवः।आकाशादिपंचकंचनित्यद्रव्याणि।समवायस्यभेदोनास्तीत्याह।समवायस्त्वेति।अभावंविभजते।
प्रागभावइति।तत्रउद्देशक्रमानुसारात्प्रथमंपृथिव्यालक्षणमाह।गंधवतीति।नाम्नापदार्थकीर्तनंउद्देशः। संर
नेर उद्देशक्रमेचसर्वत्रेच्छैवनियामिका।ननुसुरभ्यसुरभ्यवयवारब्धेद्रव्येपरस्परविरोधेनगंधस्यैवतत्रप्रत्ययाद
व्याप्तिः।नचतत्रगंधप्रतीत्यनुपपत्तिरितिवाच्यं।अवयवगंधस्यैवतत्रप्रतीतिसंभवेनचित्रगंधानंगीकारा
त्।किंचोत्पन्नविनष्टघटादावव्याप्तिरितिचेन्न।गंधसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्यविवक्षितत्वात्।
जा६ ननुजलादावपिगंधप्रतीतेरतिव्याप्तिरितिचेन्न।अन्वयव्यतिरेकाभ्यांपृथिवीगंधस्यैवतत्रभानांगीकारः।ननुत
थापिकालस्यसर्वाधारतयासर्वेषांलक्षणानांकालेअतिव्याप्तिरितिचेन्न।सर्वाधारताप्रयोजकसंबंधभिन्न
संबंधेनसलक्षणसत्त्वस्यअभिमतत्वात्।पृथिवींविभजते।साद्विधेति।नित्यत्वंध्वंसाप्रतियोगित्वं।ध्वंसप्रतियोगि
त्वमनित्यत्वंप्रकारांतरेणविभजते।पुनरिति।आत्मनोभोगायतनंशरीरं।यदवच्छेदेनात्मनिभोगोजायतेतद्भो
गायतनं।सुखदुःखसाक्षात्कारोभोगः।शब्देतरोद्भूतविशेषगुणानाश्रयत्वेसतिज्ञानकारणमनःसंयोगाश्रयत्व
मिंद्रियत्वं।शरीरेंद्रियविषयभिन्नोविषयः।एवंचगंधवच्छरीरंपार्थिवशरीरं।गंधवदिंद्रियंपार्थिवेंद्रियंगंधवान्
विषयःपार्थिवविषयइति।तत्रलक्षणंबोध्यं।पार्थिवशरीरंदर्शयतिशरीरमिति।इंद्रियंदर्शयति।इंद्रियमिति।गंध
ग्राहकमितिप्रयोजनकथनं।घ्राणमितिसंज्ञा।नासाग्रेत्याश्रयोक्तिः।एवमुत्तरत्रापिज्ञेयं।पार्थिवविषयंदर्शयति।मृत्पाषाणेति॥

अपां लक्षणमाह। शीतेति। उत्पन्नविनष्टजले। अव्याप्तिवारणाय शीतस्पर्शसमानाधिकरणद्रव्यत्वापर
जातिमत्त्वं तात्पर्यं। शीतं शिलातलमित्यादौ जलसंबंधादेव शीतस्पर्शभानमिति नातिव्याप्तिः। अन्यत्सर्वं
पूर्ववदीत्या व्याख्येयं। तेजसो लक्षणमाह। उष्णस्पर्शवदिति। उष्णं जलमित्यादौ तेजःसंबंधानुविधायित्वान्नाति
व्याप्तिः। विषयं विभजते। भौमेति। ननु सुवर्णं पार्थिवं पीतत्वात् गुरुत्वात् [illegible] हरिद्रादिवदिति चेन्न॥ अत्यंतानलसंयो
गे सति घृतादेर्द्रवत्वनाशदर्शनेन जलमध्यस्थघृते नाशादर्शनात्। [illegible] पार्थिवद्रवत्वनाशाग्निसंयो
गयोः कार्यकारणभावावधारणात्। सुवर्णस्य अत्यंतानलसंयोगे सत्यनु[illegible]मानद्रवत्वाधिकरणत्वेन पार्थिव
त्वानुपपत्तेः तस्मात्पीतद्रव्यद्रवत्वनाशप्रतिबंधकतया द्रव्यांतरसिद्धौ नैमित्तिकद्रवत्वाधिकरणतया जलत्वा
नुपपत्तिः। रूपवत्तया वाय्वादिष्वनंतर्भावात्तैजसत्वसिद्धिः। तस्योष्णस्पर्शभास्वररूपयोरुपष्टंभकपार्थि
६५ वरूपस्पर्शाभ्यां प्रतिबंधादनुपलब्धिः। तस्मात्सुवर्णं तैजसमिति॥ वायुं लक्षयति। रूपरहितेति। आकाशा
दावतिव्याप्तिवारणाय स्पर्शवानिति। पृथिव्यादावतिव्याप्तिवारणाय रूपरहित इति। ननु प्राणस्य कुत्रांतर्भाव ३
इत्यत्राह। शरीरेति। स चेति। एक एव प्राणः स्थानभेदात्प्राणापानादिशब्दैर्व्यवह्रियते। अयं स्पर्शानुमेयो वायुः।
तथाहि। योयं वायौ वाति सति अनुष्णाशीतस्पर्शो भासते स स्पर्शः क्वचिदाश्रितः। गुणत्वात् रूपवत्। न चास्य पृथिव्याश्रयः
उद्भूतस्पर्शपार्थिवस्य उद्भूतरूपत्वनियमात् न जलतेजसोः अनुष्णाशीतत्वात् न विभुचतुष्टयस्य। सर्वत्रोपलब्धिप्रसं

सर्वभावकार्यध्वंसो महाप्रलय इति विवेकात्। आकाशं लक्षयति। शब्दगुणमिति। न चाकाश[illegible]पि [illegible] पृथिव्यादिवन्नानेत्याह। ६।११
शब्दाश्रयःन
न्। गात्वमेतः परमाणुस्पर्शस्यातीन्द्रियत्वात् यः प्रतीयमानस्स वायुः। ननु वायुः प्रत्यक्षः। प्रत्यक्षस्पर्शाश्रयत्वात् घटवत्
इति चेन्न। उद्भूतरूपवत्त्वस्योपाधित्वात्। यत्र द्रव्यत्वे सति बहिरिंद्रियप्रत्यक्षत्वं तत्रोद्भूतरूपत्वमिति साध्यव्या
पकत्वं। पक्षे साधनाव्यापकत्वं। न चैवं नष्टवाद्विस्थतैजसोऽप्रत्यक्षत्वापत्तिः इष्टत्वात्। तस्माद्रूपरहितत्वाद्वायुरप्र
त्यक्षः। इदानीं कार्यरूपपृथिव्यादिचतुष्टयस्योत्पत्तिविनाशप्रकारः कथ्यते। ईश्वरस्य चिकीर्षावशात्परमाणुषु क्रि
न या जायते। परमाणुद्वयसंयोगे सति द्व्यणुकमुत्पद्यते। त्रिभिर्द्व्यणुकैस्त्र्यणुकं एवं चतुरणुकादिक्रमेण महापृथिवी मह
त्यापो महत्तेजो महान्वायुरुत्पद्यते। एवमुत्पन्नस्य कार्यद्रव्यस्य संजिहीर्षावशात् क्रिया तया परमाणुद्वयविभागे स
ति द्व्यणुकनाशस्ततस्त्र्यणुकस्य ततश्चतुरणुकस्येत्येवं पृथिव्यादिनाशः। असमवायीकारणनाशाद्व्यणुकनाशः
समवायीकारणनाशात्त्र्यणुकनाश इति संप्रदायः। सर्वत्रासमवायीकारणनाशात् द्रव्यनाश इति नवीनाः॥
किंपुनः परमाणुसद्भावे प्रमाणमुच्यते। जालसूर्यमरीचिस्थं सूक्ष्मतमं यदुपलभ्यते तत्सावयवं चाक्षुषद्रव्यत्वात्पटव
त्र्यणुकावयवोऽपि सावयवः। महदारंभकत्वात्तंतुवत्। यो द्व्यणुकावयवः स एव परमाणुः स च नित्यः। कार्यत्वेऽनवस्था
प्रसंगात्। सृष्टिप्रलयसद्भावे धाता यथापूर्वमकल्पयदित्यादिश्रुतिः प्रमाणं। सर्वकार्यद्रव्यध्वंसोऽवांतरप्रलयः। नैत्यै
कमिति नेदं प्रमाणभावादित्यर्थः। एकत्वादिवत्सर्वत्र शब्दोपलब्धेर्विभुत्वमंगीकर्तव्यमित्याह। विभ्विति। सर्वमूर्तद्र
व्यसंयोगित्वं विभुत्वं। मूर्तत्वं परिच्छिन्नपरिमाणवत्त्वं। क्रियावत्त्वं वा। विभुत्वादेवात्मवन्नित्यत्वमित्याह। नित्यं चेति। एकः

लक्षयति। अतीतेति। सर्वाधारः कालः सर्वकार्यनिमित्तकारणं च। दिशो लक्षणमाह। प्राचीति। दिगपि कार्यमा
त्रनिमित्तकारणं। आत्मनो लक्षणमाह। ज्ञानेति। आत्मानं विभजते। स द्विविध इति। परमात्मनो लक्षणमाह। तत्र
त्रेति। नित्यज्ञानाधिकरणत्वमीश्वरत्वं। नन्वीश्वरस्य सद्भावे किं प्रमाणं न तावत्प्रत्यक्षं। तद्धि बाह्यमांतरं वा। नाद्यः
अरूपिद्रव्यत्वात्। नांत्यः। आत्मसुखादिव्यतिरिक्तत्वात्। नाप्यनुमानं लिंगाभावादिति चेन्न। अंकुरादिकं कर्तृजन्यं का
र्यत्वात् घटवदित्यनुमानस्य प्रमाणत्वात्। उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वं। उपादानं स
मवायिकारणं सकलपरमाण्वादि सूक्ष्मदर्शितत्वात्। सर्वज्ञत्वं यः सर्वज्ञः सर्वविदित्यागमोऽपि तत्र प्रमाणं।
जीवस्य लक्षणमाह। जीव इति। सुखादिकं जीवलक्षणं। ननु मनुष्योऽहं ब्राह्मणोऽहमित्यादौ सर्वत्राहंप्रत्यये शरीरस्यै
व विषयत्वात् शरीरमेवात्मेति चेन्न। शरीरस्य करपादादिनाशे शरीरनाशात्। आत्मनोऽपि नाशप्रसंगात् नापीं
द्रियाणामात्मत्वं। योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामि इत्यनुसंधानाभावप्रसंगात्। अन्यानुभूतेऽन्यस्यानुसं
धानायोगात्। तस्माद्देहेंद्रियव्यतिरिक्तो जीवः सुखदुःखादिवैचित्र्यात्प्रतिशरीरं भिन्नः। स च न परमाणुः शरीर ५
व्यापिसुखानुपलब्धिप्रसंगात्। नापि मध्यमपरिमाणः। तथा सत्यनित्यत्वप्रसंगेन कृतनाशाकृताभ्यागमप्रसं
गात्। तस्मान्नित्यो विभुर्जीवः। मनसो लक्षणमाह। सुखेति। स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणं। मनो
विभजते। तच्चेति। एकैकस्यात्मन एकैकं मनः। इत्यात्मनामनेकत्वान्मनसोऽप्यनेकत्वमित्यर्थः। परमाणुरूपमि

ति। मध्यमपरिमाणत्वेऽनित्यत्वप्रसंगादित्यर्थः। ननु मनो विभु स्पर्शरहितत्वादाकाशवदिति चेन्न। मनसो विभुत्वे आत्म
मनःसंयोगस्यासमवायिकारणस्याभावात् ज्ञानानुत्पत्तिप्रसंगात्। न च विभुद्वयस्य संयोगोऽस्त्विति वाच्यं। तत्संयो
गस्य नित्यत्वेन सुषुप्त्यभावप्रसंगात् पुरीतद्व्यतिरिक्तप्रदेशात्ममनःसंयोगस्य सर्वदा विद्यमानत्वात्। अणुत्वे तु यदा
पुरीततिं प्रविशति तदा सुषुप्तिर्यदा निःसरति तदा ज्ञानोत्पत्तिरित्यणुत्वसिद्धिः॥ रूपं लक्षयति। चक्षुरिति। संख्यादावति
व्याप्तिवारणाय मात्रपदं। रूपत्वेऽतिव्याप्तिवारणाय गुणपदं। नन्वव्याप्तिः चित्ररूपे नीलादिसमुदाय एव चित्रमिति चेन्न। रूप
स्य व्याप्यवृत्तित्वनियमात्। ननु चित्रपटे अवयवरूपस्य प्रतीतिरिति चेन्न। रूपरहितत्वेन पटस्याप्रत्यक्षत्वप्रसंगात्॥
न च रूपवत्समवेतत्वं प्रत्यक्षप्रयोजकं गौरवात्। तस्मात्पटस्य प्रत्यक्षत्वानुपपत्त्या चित्ररूपसिद्धिः। रसं लक्षयति। रस
त्वेऽतिव्याप्तिवारणाय गुणपदं। रसस्याश्रयमाह। पृथिवीति। आश्रयं विभज्य दर्शयति। पृथिव्यामिति। गंधं लक्षय
ति। घ्राणेति। गंधत्वेऽतिव्याप्तिवारणाय गुणपदं। स्पर्शं लक्षयति। त्वगिति। स्पर्शत्वेऽतिव्याप्तिवारणाय गुणपदं। संयोगा
दावतिव्याप्तिवारणाय मात्रपदं। रूपादीनि। पाकजमिति। पाकस्तेजःसंयोगः तेन पूर्वरूपं नश्यति रूपांतरमुत्पद्य
त इत्यर्थः। अत्र परमाणुष्वेव पाकः न द्व्यणुकादौ ततश्च पाकनिक्षिप्तघटे परमाणुरूपांतरोत्पत्तौ श्यामघटनाशे पुनर्द्व्य
णुकादिक्रमेण रक्तघटोत्पत्तिः। तत्र परमाणुः समवायिकारणं। तेजःसंयोगसमवायिकारणमदृष्टादिकं निमित्तका
रणं द्व्यणुकादिरूपे कारणरूपमसमवायिकारणमिति। पीलुपाकवादिनः पूर्वघटस्य नाशं विनैवावयविन्यवयवेषु प

रमाणुपर्यंतेषुयुगपद्रूपांतरोत्पत्तिरितिपीठरपाकवादिनोनैयायिकाः।अतएवपार्थिवपरमाणुरूपादिकम
नित्यमित्यर्थः।अन्यत्रजलादावित्यर्थः।नित्यगतमितिपरमाणुगतमित्यर्थः।अनित्यगतमितिद्व्यणुकादि
निष्ठमित्यर्थः।रूपादिचतुष्टयमुद्भूतंप्रत्यक्षं।अनुद्भूतमप्रत्यक्षं।उद्भूतत्वंप्रत्यक्षप्रयोजकोधर्मः।तदभाव
अनुद्भूतत्वं।संख्यांलक्षयति।एकेति।परिमाणंलक्षयति।मानेति।परिमाणंविभजते।तच्चेति।भावप्रधानोनि
तर्कसं०५ र्देशः।अणुत्वंमहत्त्वंदीर्घत्वं[illegible]यर्थः।पृथक्त्वंलक्षयति।पृथगिति।इदमस्मात्पृथगितिव्यवहारकारणमित्यर्थः।
संयोगंलक्षयति।संयुक्तेति।[illegible]गेसंयुक्तावितिव्यवहारहेतुरित्यर्थः।संख्यादिलक्षणेषुसर्वत्रदिक्कालादावति
व्याप्तिवारणायासाधारणे[illegible]संयोगोद्विविधः।कर्मजःसंयोगजश्च।आद्योहस्तक्रिययापुस्तकसंयोगःद्विती
योहस्तपुस्तकसंयोगात्क[illegible]पुस्तकसंयोगः।अव्याप्यवृत्तिःसंयोगःस्वात्यंताभावसमानाधिकरणत्वमव्या
प्यवृत्तित्वं।विभागंलक्षय[illegible]संयोगेति।कालादावतिव्याप्तिवारणायगुणइति।रूपादावतिव्याप्तिवारणा
यसंयोगविनाशइति।वि[illegible]पिकर्मजोविभागश्च।आद्योहस्तपुस्तकविभागः।द्वितीयःकायपुस्तकवि ५
भागः।परत्वापरत्वयोर्लक्षणमाह।परापरेति।परव्यवहारकारणंपरत्वं।अपरव्यवहारकारणमपर
त्वमित्यर्थः।विभजते।द्विधेति।दिक्कृतयोरुदाहरणमाह।दूरस्थइति।कालकृतेउदाहरति।ज्येष्ठइति।गु
रुत्वंलक्षयति।आद्येति।द्वितीयादिपतनस्यवेगासमवायिकारणत्वात्।वेगेतिव्याप्तिवारणायाद्येति।

द्रवत्वंलक्षयति।स्यंदनेति।स्यंदनंस्रवणं।तेजःसंयोगजन्यंनैमित्तिकंतद्भिन्नंसांसिद्धिकं।पृथिव्यांनैमित्तिकमुदाहर
ति।घृतादाविति।तेजसितदाहसुवर्णादाविति।स्नेहंलक्षयति।चूर्णेति।कालादावतिव्याप्तिवारणायगुणेति।रूपा
दावतिव्याप्तिवारणायपिंडीभावेति।शब्दंलक्षयति।श्रोत्रेति।शब्दत्वेतिव्याप्तिवारणायगुणइति।रूपादावतिव्या
प्तिवारणायश्रोत्रग्राह्येति।शब्दस्त्रिविधः।संयोगजोविभागजः।शब्दजश्चेति।तत्राद्यःभेरीदंडसंयोगजन्यः।द्वितीयोवं
शेपाट्यमानेदलद्वयविभागजन्यश्चटचटशब्दः।भेर्यादिदेशमारभ्यश्रोत्रपर्यंतंद्वितीयादिशब्दाःशब्दजाः।बुद्धेर्लक्ष
णमाह।बुद्धिरिति।जानामीत्यनुव्यवसायगम्यमानत्वमेवलक्षणमित्यर्थः।बुद्धिंविभजते।सेति।स्मृतेर्लक्षणमाह।संस्का
रेति।भावनाख्यःसंस्कारः।संस्कारध्वंसेतिव्याप्तिवारणायज्ञानमिति।घटादिप्रत्यक्षेतिव्याप्तिवारणायसंस्कारज
न्यमिति।अनुभवंलक्षयति।तद्भिन्नमिति।स्मृतिभिन्नज्ञानमनुभवमित्यर्थः।अनुभवंविभजते।सद्विविधइति।यथा
र्थानुभवस्यलक्षणमाह।तद्वतीति।ननुघटेघटत्वमितिप्रमायामव्याप्तिः।घटत्वेघटाभावादितिचेन्न।यत्रयत्संबंधो
ऽस्तितत्रतत्संबंधानुभवइत्यर्थात्।घटत्वेपिसंबंधोऽस्तीतिनाव्याप्तिः।सैवेति।यथार्थानुभवएवशास्त्रेप्रमेत्युच्यतइत्य
र्थः।अयथार्थंलक्षयति।तदभाववतीति।नन्विदंसंयोगीतिप्रमायामतिव्याप्तिरितिचेन्न।यदवच्छेदेनयत्संबंधाभाव
स्तदवच्छेदेनतत्संबंधज्ञानस्यविवक्षितत्वात्।संयोगाभावावच्छेदेनसंयोगज्ञानस्यभ्रमत्वात्।संयोगावच्छेदेनसंयोगसंबं
धस्यसत्त्वान्नातिव्याप्तिः।यथार्थानुभवंविभजते।यथार्थेति।प्रसंगात्प्रमाकरणंविभजते।तत्करणमितिप्रमाकरणमित्यर्थः।

प्रमाकरणंप्रमाणमितिप्रमाणसामान्यलक्षणं।करणलक्षणमाह।असाधारणमिति।साधारणंका
रणंदिक्कालावतिव्याप्तिवारणायासाधारणेति।कारणलक्षणमाह।कार्येति।पूर्ववृत्तिकारणमित्युक्तेरासभा
दावतिव्याप्तिःस्यादतोनियतेति।तावन्मात्रेकृतेकार्येऽतिव्याप्तिरतःपूर्ववृत्तीति।ननुतंतुरूपमपिपटंप्रतिकार
णंस्यादितिचेन्न।अनन्यथासिद्धत्वेसतीतिविशेषणात्।अनन्यथासिद्धत्वमन्यथासिद्धिविरहः।अन्यथासिद्धिश्च
त्रिविधायेनसहैवयस्ययंप्रतिपूर्ववृत्तित्वमवगम्यतेतंप्रतितदन्यथासिद्धंयथातंतुनातंतुरूपंतंतुत्वंचपटंप्रति
अन्यंप्रतिपूर्ववृत्तित्वेज्ञातेएवयस्ययंप्रतिपूर्ववृत्तित्वमवगम्यतेतंप्रतितदन्यथासिद्धं।यथाशब्दंप्रतिपूर्ववृत्तित्वे
तएवपटंप्रत्याकाशस्य।अन्यत्रावश्यक्लृप्तपूर्ववृत्तिनएवकार्यसंभवेतत्सहभूतमन्यथासिद्धं।यथापाकज
स्थलेगंधंप्रतिरूपप्रागभावस्य।एवंचानन्यथासिद्धनियतपूर्ववृत्तित्वंकारणत्वं।कार्यलक्षणमाह।कार्यमिति।
कारणंविभजते।कारणमिति।समवायिकारणलक्षणमाह।यत्समवेतमितियस्मिन्समवेतमित्यर्थः।अ
समवायिकारणलक्षणमाह।कार्येति।कार्येणेत्येतदुदाहरति।तंतुसंयोगइतिकार्येणपटेनैकस्मिंस्तंतौस ६
मवेतत्वात्तंतुसंयोगःपटस्यासमवायिकारणमित्यर्थः।निमित्तकारणंलक्षयति।तदुभयेति।समवाय्यस ६
मवायिभिन्नकारणंनिमित्तकारणमित्यर्थः।करणलक्षणमुपसंहरति।तदेतदिति।प्रत्यक्षलक्षण
माह।तत्रेति।प्रमाणचतुष्टयमध्यइत्यर्थः।प्रत्यक्षज्ञानलक्षणमाह।इंद्रियेति।इंद्रियंचक्षुरादिकमर्थोघट

दिःतयोःसंनिकर्षःसंयोगादिस्तज्जन्यंज्ञानमित्यर्थः।निर्विकल्पकस्यलक्षणमाह।निःप्रकारकमिति।विशेषणविशे
षणविशेष्यसंबंधानवगाहिज्ञानमित्यर्थः।ननुनिर्विकल्पकेकिंप्रमाणमितिचेन्न।गौरितिविशिष्टज्ञानंविशेषणजन्यं
विशिष्टज्ञानत्वाद्दंडीतिज्ञानवदित्यनुमानस्यप्रमाणत्वात्विशेषणज्ञानस्यापिसविकल्पकत्वेऽनवस्थाप्रसंगान्नि
र्विकल्पकंसिद्धं।सविकल्पकंलक्षयति।सप्रकारकमिति।नामजात्यादिविशेषणविशेष्यसंबंधावगाहिज्ञानमित्यर्थः।
सविकल्पकमुदाहरति।यथेति।इंद्रियार्थसंनिकर्षंविभजते।प्रत्यक्षेति।संयोगसंनिकर्षमुदाहरति।चक्षुषेति।द्रव्य
प्रत्यक्षेसर्वत्रसंयोगःसंनिकर्षइत्यर्थः।आत्मामनसासंयुज्यतेमनइंद्रियेणेंद्रियमर्थेनततःप्रत्यक्षज्ञानमुत्पद्यते।सं
युक्तसमवायमुदाहरति।घटरूपेति।तत्रयुक्तिमाह।चक्षुःसंयुक्तेति।संयुक्तसमवेतसमवायमुदाहरति।रूप
त्वेति।समवायमुदाहरति।श्रोत्रेणेति।तदुपपादयति।कर्णेति।ननुदूरस्थशब्दस्यकथंश्रोत्रसंबंधइतिचेन्न।वीचि
न्या तरंगन्यायेनकदंबमुकुलन्यायेनवाशब्दांतरोत्पत्तिक्रमेणश्रोत्रदेशेजातस्यश्रोत्रसंबंधात्प्रत्यक्षत्वसंभवात्।समवे
तसमवायमुदाहरति।शब्दत्वेति।विशेषणविशेष्यभावमुदाहरति।अभावेति।तदुपपादयति।घटाभाववदिति।भूत
लेघटोनास्तीत्यत्राभावस्यविशेष्यत्वंद्रष्टव्यं।एतेनानुपलब्धेःप्रमाणत्वंनिरस्तं।यत्रघटोभविष्यत्तदाभूतलमिवा
द्रक्ष्यत्।दर्शनाभावान्नास्तीतितर्कितप्रतियोगिसत्त्वविरोध्यनुपलब्धिसहकृतेनेंद्रियेणैवाभावज्ञानोत्पत्त्यावनुप
लब्धेःप्रमाणांतरत्वासंभवादधिकरणज्ञानार्थमपेक्षणीयेंद्रियस्यैवकरणत्वोपपत्तावनुपलब्धेःकरणत्वस्यायुक्तत्व

त्व। विशेषणविशेष्यभावो विशेषणविशेष्यस्वरूपमेव नातिरिक्तः संबंधः। प्रत्यक्षज्ञानमुपसंहरंस्तस्य कारणमा
ह। एवमिति। असाधारणकारणत्वादिंद्रियं प्रत्यक्षज्ञानकरणमित्यर्थः प्रत्यक्षज्ञानमुपसंहरति। तस्मादिति। अनु
मानं लक्षयति। अनुमितिकरणमिति। अनुमितेर्लक्षणमाह। परामर्शेति। ननु संशयोत्तरप्रत्यक्षेऽतिव्याप्तिः।
स्थाणुपुरुषसंशयानंतरं पुरुषत्वव्याप्यकरादिमानयमिति परामर्शे सति पुरुष एवेति प्रत्यक्षजननात् न च तत्रानुमि
तिरिति वाच्यं। पुरुषं साक्षात्करोमीत्यनुव्यवसायविरोधादिति चेन्न। पक्षतासहकृतपरामर्शजन्यत्वस्य वि
वक्षितत्वात्। सिसाधयिषाविरहसहकृतसिद्ध्यभावः पक्षता। साध्यसिद्धिरनुमितिप्रतिबंधिका। सिद्धिस
त्त्वेप्यनुमिनुयामितीच्छायामनुमितिदर्शनात्। सिसाधयिषोत्तेजिका ततश्चोत्तेजकाभावविशिष्टमणेरभा
वस्य दाहकारणत्वात् सिसाधयिषाविरहसहकृतसिद्ध्यभावस्याप्यनुमितिकारणत्वं परामर्शं लक्षयति।
व्याप्तीति। व्याप्तिविशिष्टपक्षधर्मताज्ञानं स परामर्श इत्यर्थः। परामर्शमभिनीय दर्शयति। यथेति।
अनुमितिमभिनयति। तज्जन्यमिति। परामर्शजन्यमित्यर्थः। व्याप्तेर्लक्षणमाह। यत्रेति यत्र धूम इति ७
व्याप्तिरभिनयः साहचर्यनियम इति लक्षणं साहचर्यं समानाधिकरण्यं तस्य नियमः हेतुसमाना
धिकरणात्यंताभावाप्रतियोगिसाध्यसमानाधिकरणव्याप्तिरित्यर्थः। पक्षधर्मतास्वरूपमाह। व्याप्य
स्येति। अनुमानं विभजते। अनुमानमिति। स्वार्थानुमितिमिति दर्शयति। स्वयमेव भूयो दर्शनेनेति॥

अनुपसंहारिणो लक्षणमाह। अन्वयेति। विरुद्धत्वं लक्षयति। साध्येति। सत्प्रतिपक्षं लक्षयति। यस्येति। उदाहरति।
यथेति। असाधारणं लक्षयति। यस्येति। असिद्धं विभजते। असिद्ध इति। आश्रयासिद्धमुदाहरति। गगनेति। स्वरू
पासिद्धमुदाहरति। शब्द इति। व्याप्यत्वासिद्धस्य लक्षणमाह। सोपाधिक इति। उपाधिलक्षणमाह। साध्येति। उपाधि
श्चतुर्विधः। केवलसाध्यव्यापकः। पक्षधर्मावच्छिन्नसाध्यव्यापकः। साधनावच्छिन्नसाध्यव्यापकः। उदासीनधर्माव
च्छिन्नसाध्य। व्यापकश्चेति। आद्यः आर्द्रेंधनसंयोगः द्वितीयः यथा वायुः प्रत्यक्षः प्रमेयत्वादित्यत्र बहिर्द्रव्यत्वावच्छि
न्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वं। तृतीयो यथा प्रागभावो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्वव्याप
कभावत्वं। चतुर्थस्तु प्रागभावो विनाशी प्रमेयत्वादित्यत्र प्रमेयत्वावच्छिन्नानित्यत्वव्यापकभावत्वं च। बाधितस्य
लक्षणमाह। यस्येति। अत्र बाधस्य ग्राह्याभावनिश्चयत्वेन सत्प्रतिपक्षस्य विरोधिज्ञानसामग्रीत्वेन च साक्षादनु
मितिप्रतिबंधकत्वं। इतरेषां तु परामर्शप्रतिबंधकत्वं। तत्रापि साधारणस्य व्यभिचारभावतया विरुद्धस्य समा
नाधिकरणभावतया व्याप्यत्वासिद्धस्य विशिष्टव्याप्त्यभावतया साधारणानुपसंहारिणोः व्याप्तिसंशयाधाय
कत्वेन च व्याप्तिज्ञानप्रतिबंधकत्वं। आश्रयासिद्धिस्वरूपासिद्ध्योः पक्षधर्मताज्ञानप्रतिबंधकत्वं। उपाधिस्तु व्यभि
चारज्ञानद्वारा व्याप्तिज्ञानप्रतिबंधकः। सिद्धसाधनं तु पक्षताविघटकतया आश्रयासिद्धेऽन्तर्भवतीति निग्रहस्था
नांतरमिति नवीनाः। उपमानं लक्षयति। उपमितीति। शब्दं लक्षयति। आप्तेति। वाक्यं लक्षयति। वाक्यमिति। पदलक्ष

णमाह। शक्तमिति। अर्थस्मृत्यनुकूलपदार्थसंबंधः शक्तिः। सा च पदार्थांतरमिति मीमांसकाः। तन्निरा-
सार्थमाह। अस्मादिति। डित्थादीनामिव घटादीनामपि संकेत एव शक्तिः। न तु पदार्थांतरमित्यर्थः। गवादि-
शब्दानां जातावेव शक्तिः विशेषणतया जातेः प्रथममुपस्थितत्वात्। व्यक्तिलाभस्त्वाक्षेपादिना इति
चेन्न। गामानयेत्यादौ वृद्धव्यवहारे सर्वत्रानयनादेर्व्यक्तावेव संभवेन जातिविशिष्टव्यक्तावेव शक्तिकल्प-
नात्। शक्तिग्रहश्च वृद्धव्यवहारेण व्युत्पत्सुर्बालो गामानयेत्युत्तमवृद्धवाक्यश्रवणानंतरं मध्यम-
वृद्धस्य प्रवृत्तिमुपलभ्य गवानयनं च दृष्ट्वा मध्यमवृद्धप्रवृत्तिजनकज्ञानस्यान्वयव्यतिरेकाभ्यां
वाक्यजन्यत्वं निश्चित्य अश्वमानय गां बधानेति वाक्यांतरे आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे
रश्वपद शक्तेस्याश्वत्वविशिष्टे। शक्तिरिति व्युत्पद्यते। ननु सर्वत्र कार्यपरत्वाद्व्यवहारस्य कार्यवाक्य एव व्युत्प-
त्तिः। न सिद्धपदे इति चेन्न। काश्यां त्रिभुवनतिलको भूपतिरित्यादौ सिद्धेपि व्यवहारात्। विकसितपद्मे मधु-
कर इत्यादौ प्रसिद्धपदसमभिव्याहारात् सिद्धेपि मधुकरादौ व्युत्पत्तिदर्शनाच्च। लक्षणापि शब्दवृत्तिः॥ ५
शक्यसंबंधो लक्षणा। गंगायां घोष इत्यत्र गंगापदवाच्यप्रवाहसंबंधादेव तीरोपस्थितौ तीरे शक्तिः न क-
ल्प्यते। सैंधवादौ लवणाश्वयोः परस्परसंबंधाभावान्नानाशक्तिकल्पनं। लक्षणा त्रिविधा। जहल्लक्ष-
णा अजहल्लक्षणा जहदजहल्लक्षणेति। यत्र वाच्यार्थस्यान्वयाभावः तत्र जहदिति। यथा मंचाः क्रो-

ननु पार्थिवत्वलोहलेख्यत्वादौ शतशः सहचारदर्शनेपि व्यभिचारोपलब्धेः भूयोदर्शनं कथं व्याप्तिग्रा-
हकमिति चेन्न। व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्य व्याप्तिग्राहकत्वात्। व्यभिचारज्ञानं निश्च-
यः शंका च तद्विरहः। क्वचित्तर्कात् क्वचित्स्वतः सिद्ध एव धूमाग्निव्याप्तिग्रहे कार्यकारणभावभंगप्रसंगलक्ष-
णस्तर्कः व्यभिचारशंकानिवर्तकः। ननु सकलवह्निधूमयोरसंन्निकर्षात् कथं व्याप्तिग्रह इति चेन्न। धूमत्ववह्नि-
त्वरूपसामान्यप्रत्यासत्त्या सकलधूमवह्निविषयकज्ञानसंभवात्। तस्मादिति लिंगपरामर्शादित्यर्थः॥ परार्था-
नुमानमाह। यत्त्विति। यच्छब्दस्य तत्परार्थानुमानमिति तच्छब्देनान्वयः। पंचावयववाक्यमुदाहरति। यये
अवयवस्वरूपमाह। प्रतिज्ञेति। उदाहृतवाक्ये प्रतिज्ञामाह। पर्वतोग्निमानिति साध्यवत्तया पक्षवचनं प्र-
तिज्ञा। पंचम्यंतं प्रतिपादकं हेतुः। व्याप्तिप्रतिपादकमुदाहरणं। पक्षधर्मताज्ञानार्थमुपनयः। अबाधितत्वा-
दिकं निगमनं प्रयोजनं। अनुमितिकरणमाह। स्वार्थेति। ननु व्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्यामेवानुमितिसं-
भवे विशिष्टपरामर्शः। किमर्थमंगीकर्तव्यमिति चेन्न। वह्निव्याप्यधूमवानयमिति शाब्दपरामर्शस्थले परा-
मर्शस्यावश्यकतया लाघवेन सर्वत्र परामर्शस्यैव कारणत्वात् लिंगं न कारणं अतीतादौ व्यभिचारात्। व्याप-
रवत्कारणं करणमिति मते परामर्शद्वारा व्याप्तिरिति ज्ञानं कारणं तज्जन्यत्वे सति तज्जन्यजनकोऽवांतर-
व्यापारः। अनुमानमुपसंहरति। तस्मादिति लिंगं विभजते। लिंगमिति। अन्वयव्यतिरेकिणं लक्ष-

यति। अन्वयेनेति। हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिः। तदभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः। केवलान्वयिनो
लक्षणमाह। अन्वयीति। केवलान्वयिसाधकं केवलान्वयि। अत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं। ई
श्वरप्रमाविषयत्वं सर्वपदार्थाभिधेयत्वं च सर्वत्रास्तीति व्यतिरेकाभावः। व्यतिरेकिणमुदाहरति। पृथिवीति।
नन्वितरभेदः प्रसिद्धो न वा। आद्ये यत्र प्रसिद्धस्तत्र हेतुसत्त्वेऽन्वयित्वं। असत्त्वेऽसाधारण्यं। द्वितीये साध्य
ज्ञानाभावात् कथं विशिष्टानुमितिः। विशेषणज्ञानाभावे विशिष्टज्ञानानुदयात्। प्रतियोगिज्ञानाभावाद्व्यतिरेक
व्याप्तिज्ञानमपि न स्यादिति चेन्न। जलादित्रयोदशान्योन्याभावानां त्रयोदशसु प्रत्येकं प्रसिद्धानां मेलनं
पृथिव्यां साध्यते। त्रयोदशत्वावच्छिन्नसाध्यस्यैकाधिकरणवृत्तित्वाभावात् नान्वयित्वासाधारण्ये प्रत्ये
काधिकरणं प्रसिध्या साध्यविशिष्टानुमितिः। व्यतिरेकव्याप्तिं निरूपयति। यदिति। साध्याभावव्यापकीभू
ताभावप्रतियोगित्वमिति व्यतिरेकव्याप्तिनिरूपणं चेति। पक्षलक्षणमाह। संदिग्धेति। ननु श्रवणानन्तरमभ ८
विमननस्थलेऽव्याप्तिः। तत्र वेदवाक्यैरात्मनो निश्चितत्वेन संदेहाभावात्। किंच प्रत्यक्षेऽपि वह्नौ यत्रेच्छयानुमितिस्त
त्राव्याप्तिरिति चेन्न। उक्तपक्षताश्रयत्वस्य पक्षलक्षणत्वात्। सपक्षलक्षणमाह। निश्चितेति। एवं सद्धेतून्निरू
प्यासद्धेतून्निरूपयितुं विभजते। सव्यभिचारेति। अनुमितिप्रतिबंधकयथार्थज्ञानविषयत्वं हेत्वाभासत्वं। सव्य
भिचारं विभजते। स त्रिविध इति। साधारणं लक्षयति। तत्रेति। उदाहरति। यथेति। असाधारणं लक्षयति। सर्वेति।

जोर२

शतीति। अत्र वाच्यस्यान्वयः। तत्राजहदिति। यथा छत्रिणो गच्छंतीति। अत्र वाच्यैकदेशत्यागेनैकदेशान्वयः।
तत्र जहदजहदिति। यथा तत्त्वमसीति। एवमपि लक्षणैव लक्ष्यमाणगुणसंबंधरूपा अग्निर्माणवक इति। व्यंजनापि शक्तिल
क्षणान्तर्भूता। अर्थशक्तिमूला च। अनुमानादिनान्यथासिद्धा। तात्पर्यानुपपत्तिर्लक्षणाबीजं। तत्प्रतीतीच्छयो
च्चरितत्वं तात्पर्यार्थः। तात्पर्यज्ञानं च वाक्यार्थज्ञाने हेतुः। नानार्थानुरोधात् प्रकरणादिकं तात्पर्यग्राहकं द्वारमित्य
त्रोऽपि धेहीति शब्देऽध्याहारः। नन्वर्थज्ञानार्थत्वाच्छब्दस्यार्थमविज्ञाय शब्दाध्याहारासंभवादर्थाध्याहार एव युक्त इ
ति चेन्न। पदविशेषजन्यपदार्थोपस्थितेः शाब्दज्ञाने हेतुत्वात् अन्यथा घटः कर्मत्वं आनयनं कृतिरित्यत्रापि शाब्दज्ञानप्र
संगात्। पंकजादिपदेषु योगरूढिः। अवयवशक्तिर्योगः। समुदायशक्तिः रूढिः। नियतपद्मत्वज्ञानार्थं समुदायश
क्तिः। अन्यथा कुमुदेऽपि प्रयोगप्रसंगः। इतरान्वये शक्तिरिति प्राभाकराः। अन्वयस्य वाक्यार्थतया भानप्रसंगात्॥
अन्वयांशेऽपि शक्तिर्न कल्पनीयेति गौतमीयाः। आकांक्षेति। आकांक्षादिज्ञानमित्यर्थः। अन्यथा कांक्षादिभ्रमात्
शाब्दधीभ्रमो न स्यात्। आकांक्षां लक्षयति। पदस्येति। योग्यतालक्षणमाह। अर्थेति। संनिधिलक्षणमाह। पदानामिति।
अविलंबेन पदार्थोपस्थितिः संनिधिः उच्चारणं तदुपयोगि। तयोर्गौरश्व इति। घटः कर्मत्वमित्यनाकांक्षोदाहर
णं द्रष्टव्यं। वाक्यं विभजते। वाक्यमिति। वैदिकस्य विशेषमाह। वैदिकमीश्वरोक्तत्वादिति। ननु वेदस्यानादित्वात्कथमी
श्वरोक्तत्वमिति चेन्न। वेदः पौरुषेयः वाक्यसमूहत्वात् भारतादिवत्। न च स्मर्यमाणकर्तृत्वमुपाधिः। गौतमादिभिः

शिष्यपरंपरयावेदेपिकर्तृस्मरणेनसाधनव्यापकत्वात्।तस्मात्तपस्तेपानात्त्रयोवेदाअजायंतइतिश्रुतेश्च।वर्णानि
त्याः।सएवायंगकारइतिप्रत्यभिज्ञाबलात्।कथंवेदस्यानित्यत्वमितिचेन्न।उत्पन्नोगकारोनष्टोगकारइतिप्रती
त्यावर्णानामनित्यत्वात्सोयंगकारइतिप्रत्यभिज्ञायाःसेयंदीपज्वालेतिवत्तज्जात्यवलंबनत्वात्।वर्णानांनित्यत्वेपिआ
नुपूर्वीविशिष्टवाक्यस्यानित्यत्वाच्च।तस्मादीश्वरोक्तोवेदः।मन्वादिस्मृतीनामाचाराणांचवेदमूलत्तयाप्रामाण्यंस्मृति
मूलवाक्यानामिदानीमनध्ययनात्।तन्मूलभूताकाचिच्छाखोच्छिन्नेतिकल्प्यते।ननुपठ्यमानवेदवाक्योत्सा
दस्यकल्पयितुमशक्यतयाविप्रकीर्णवादस्यायुक्तत्वान्नित्यानुमेयोवेदोमूलमितिचेन्न।तथापिवर्णानुपूर्वीज्ञाना
भावेनबोधकत्वासंभवात्।नन्वेतानिपदानिस्मारितार्थसंसर्गवंत्याकांक्षादिमत्पदकदंबकत्वात्।मद्वाक्यवदि
त्यनुमानादेवसंसर्गज्ञानसंभवाच्छब्दोनप्रमाणांतरमितिचेन्न।अनुमित्यपेक्षयाशाब्दज्ञानस्यशब्दात्प्रत्येमीत्यनु
व्यवसायसाक्षिकत्वस्यसर्वसंमतत्वात्।नन्वर्थापत्तिरपिप्रमाणांतरमस्तीतिपीनोदेवदत्तोदिवानभुंक्तइतिदृष्टेश्रुते १०
वापीनत्वान्यथानुपपत्त्यारात्रिभोजनमर्थापत्त्याकल्प्यतइतिचेन्न।देवदत्तोरात्रौभुंक्तेदिवाऽभुंजानत्वेसतिपीनत्वादित्य
नुमानेनैवरात्रिभोजनस्यसिद्धत्वात्।शतेपंचाशदितिसंभवोप्यनुमानमेव।इहवटेयक्षस्तिष्ठतीत्यैतीह्यमप्यज्ञा
तमूलकवक्तृकः।शब्दएवचेष्टापिशब्दानुमानद्वाराव्यवहारहेतुरितिनप्रमाणांतरंतस्मात्प्रत्यक्षानुमानोपमानशब्दाश्च न
त्वार्येवप्रमाणानि।ज्ञानानांतद्वतितत्प्रकारकत्वंस्वतोग्राह्यंपरतोवेतिविचार्यतेतत्रविप्रतिपत्तिः।ज्ञानप्रामाण्यंतदप्रा

माण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यंनवा।अत्रविधिकोटिःस्वतस्त्वं।अनुमानग्राह्यत्वेनसिद्धसाधनवारण
याायावदिति।इदंज्ञानमप्रमेतिज्ञानेनप्रामाण्याग्रहात्तद्बाधवारणायाप्रामाण्याग्राहकेति।इदंज्ञानमप्रमेत्यनु
व्यवसायनिष्ठप्रामाण्यग्राहकस्याप्रामाण्याग्राहकस्याप्यनुव्यवसायितद्ग्राहकत्वात्स्वतस्त्वसिद्धिः।ननुस्व
तएवप्रामाण्यंगृह्यतेघटमहंजानामीत्यनुव्यवसायेनघटघटत्वयोरिवतत्संबंधस्यापिविषयीकरणात्व्यवसा
यरूपप्रत्यासत्तेस्तुल्यत्वात्पुरोवर्तिनिप्रकारसंबंधस्यैवप्रमात्वपदार्थत्वादितिचेन्न।स्वतःप्रामाण्यग्रहेजलज्ञानंप्रमा
नवेत्यनभ्यासदशायांप्रमात्वसंशयोनस्यात्।अनुव्यवसायेनप्रामाण्यस्यनिश्चितत्वात्।तस्मात्स्वतोग्राह्यत्वा
भावात्परतोग्राह्यत्वं।तथाहिप्रथमंजलज्ञानानंतरंप्रवृत्तौसत्यांजललाभेसतिपूर्वोत्पन्नंजलज्ञानंप्रमासमर्थ
प्रवृत्तिजनकत्वात्।यन्नैवंतन्नैवं।अप्रमेतिव्यतिरेकिणाप्रमात्वंनिश्चीयते।द्वितीयादिज्ञानेपूर्वज्ञानदृष्टांते
नतत्सजातीयत्वलिंगेनान्वयव्यतिरेकिणापिगृह्यते।प्रमायांगुणजन्यत्वमुत्पत्तौपरतस्त्वंप्रमाअसाधार
णकारणंगुणः।अप्रमासाधारणंकारणंदोषः।तत्रप्रत्यक्षेविशेषणवत्तद्विशेष्यसंनिकर्षोगुणः।अनुमितौ
व्यापकवतिव्याप्यज्ञानंउपमितौयथार्थसादृश्यज्ञानंशाब्दज्ञानेयथार्थयोग्यताज्ञानमित्या ह्यं।पुरोवर्ति
निप्रकाराभावस्यव्यवसायेनानुपस्थि त्वादप्रमात्वंपरतएवगृह्यते।पित्तादिदोषजन्यत्वादुत्पत्तौपरतस्त्वंन
नुसर्वज्ञानानांयथार्थत्वादयथार्थज्ञानमेवनास्तिनचशुक्ताविदंरजतमितिज्ञानात्प्रवृत्तिदर्शनादन्यथाअ

व्याप्तिसिद्धिरिति वाच्यं। रजतस्मृतिपुरोवर्त्तिज्ञानाभ्यामेव प्रवृत्तिसंभवात् उपस्थितेष्टभेदाग्रहस्यैव सर्वत्रप्र
वर्त्तकत्वेन नेदं रजतमित्यादावतिप्रसंगाभावादिति चेन्न। सत्यरजतस्थले पुरोवर्त्तिविशेष्यकरजतत्वप्रकारक
ज्ञानस्य लाघवेन प्रवृत्तिजनकतया शुक्तावपि रजतार्थी प्रवृत्तिजनकत्वेन विशिष्टज्ञानस्यैव कल्पनात्। अयथार्था
नुभवं विभजते। अयथार्थेति। स्वप्नस्य मानसविपर्ययरूपत्वान्न त्रैविध्यविरोधः। संशयलक्षणमाह। एकेति।
घटपटाविति समूहालंबनेतिव्याप्तिवारणायैकेति। घटो द्रव्यमित्यादावतिव्याप्तिवारणाय नानेति। विपर्ययल
क्षणमाह। मिथ्येति। तदभाववति तत्प्रकारकनिश्चय इत्यर्थः। तर्कं लक्षयति। व्याप्येति। यद्यपि विपर्ययेंतर्भवति
तथापि प्रमाणानुग्राहकत्वाद्भेदेन कीर्त्तनं। स्मृतिं वि——ति। स्मृतिरिति सुखं लक्षयति। सर्वेषामिति। सुखमहमित्या
द्यनुव्यवसायगम्यसुखत्वादिकमेव लक्षणं यथाश्रुतं नतु स्वरूपकथनमिति द्रष्टव्यं। संस्कारं विभजते। संस्कार इति। सं
स्कारत्वजातिमान् संस्कारः। वेगस्याश्रयमाह। पृथिव्यादीति। वेगत्वजातिमान् वेगः। भावनां लक्षयति। अनुभवेति। आ ११
त्मादावतिव्याप्तिवारणायानुभवेति। अनुभवध्वंसेति। व्याप्तिवारणाय स्मृतीति। स्मृतेरपि संस्कारजनकत्वं। नवीनै
रुक्तं। स्थितिस्थापकं लक्षयति। अन्यथेति। संख्यादयोष्टौ नैमित्तिकद्रवत्ववेगस्थितिस्थापकाः। सामान्यगुणाः। अन्ये रू
पादयो विशेषगुणाः। द्रव्यविभाजकोपाधिद्वयसमानाधिकरणावृत्तिजातिमत्त्वं विशेषगुणत्वं। कर्मणो लक्षणमाह। च
लनात्मकं कर्म। उत्क्षेपणादीनां कार्यभेदमाह। ऊर्द्ध्वेति। शरीरेति। वक्रतासंपादनमाकुंचनम् ऋजुतासंपादकं प्रसारणमि

त्यर्थः। सामान्यलक्षणमाह। नित्येति परमाणुपरिमाणादावतिव्याप्तिवारणायाने——। अनुगतत्वं समवेतत्वं तेन नाभा
वादावतिव्याप्तिः। विशेषं लक्षयति। नित्येति। समवायं लक्षयति। नित्य इति। संयोगेतिव्याप्तिवारणाय नित्य इति। आकाशादतिव्या
प्तिवारणाय संबंध इति। अयुतसिद्धलक्षणमाह। ययोरिति। नीलघट इति विशिष्टप्रतीतिर्विशेषणविशेष्यसंबंधविषया विशिष्ट
प्रत्ययत्वाद्दंडीप्रत्ययवदिति समवायसिद्धिः। अवयवावयविनाविति। द्रव्यसमवायिकारणमवयवः जन्यद्रव्यमवयवी। प्रागभावं ल
क्षयति। अनादिरिति। आकाशादावतिव्याप्तिवारणाय सांत इति व——वतिव्याप्तिवारणायानादिरिति। प्रतियोगिसमवायिका
रणवृत्तिः प्रतियोगिजनकः भविष्यतीति व्यवहारहेतुः प्रागभावः। ध्वंसं लक्षयति सादिरिति। घटादावतिव्याप्तिवारणायानंत इति
आकाशादावतिव्याप्तिवारणाय सादिरिति। प्रतियोगिजन्यः प्रतियोगिसमवायिवृत्तिः ध्वंसव्यवहारहेतुः ध्वंसः। अत्यंता
भावं लक्षयति त्रैकालिक इति। अन्योन्याभावेतिव्याप्तिवारणाय संसर्गावच्छिन्नेति। ध्वंसप्रागभावयोरतिव्याप्तिवारणाय
त्रैकालिक इति अन्योन्याभावं लक्षयति। तादात्म्येति। प्रतियोगितावच्छेदक आरोप्यसंसर्गभेदादेकप्रतियोगिकयोरत्यंता
भावान्योन्याभावयोर्बहुत्वं केवलदेवदत्ताभावाद्दंड्यभाव इति प्रतीत्या विशिष्टाभावः एकसत्त्वे द्वौ नस्तः। इति प्रतीत्या द्वित्वाव
च्छिन्नाभावः संयोगसंबंधेन घटवति समवायसंबंधेन घटाभावः। न च घटाभावाद्घटत्वावच्छिन्नप्रतियोगिकसामान्याभावश्चा
तिरिक्तः। एवमन्योन्याभावोपि। घटत्वावच्छिन्नः पटो नास्तीति व्यधिकरणधर्मावच्छिन्नाभावो नांगीक्रियते पटे घटत्वं नास्ती
ति तस्यार्थः। अतिरिक्तत्वे सकेवलान्वयिसामवायिकाभावोत्यंताभाव एव समयविशेषे प्रतीयमानः घटाभाववति घटानय

निःत्यंताभावस्यान्यत्रगमनाभावेप्यप्रती— तेः घटापसरणे सति भूतलघटसंयोगप्रागभावप्रध्वंसयोरत्यंताभावप्र
तीतिकल्पनं कल्प्यते घटवति तत्संयोगप्रागभावध्वंसयोरसत्वादत्यंताभावस्याप्रतीतिर्घटापसरणे च संयोगध्वंसस
त्वात्प्रतीतिः केवलाधिकरणादेव नास्तीति व्यवहारोपपत्तावभावो न पदार्थांतरमिति गुरवस्तन्न। अभावानंगीकारे
विकल्पस्य निर्वक्तुमशक्यत्वादभावो भावो भाव एव नातिरिक्तः। अनवस्थाप्रसंगात् ध्वंसप्रागभावध्वंसप्रतियोग्येव अभा
वाभावोऽतिरिक्त एव तृतीयाभावस्य प्रथमत्वात् नानावस्थवत्तिनविनीना। ननु प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धां
तावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजातिनिग्रहस्थानानां तत्वज्ञानान्निश्रेयसाधिगम इति न्यायसूत्रे
ष्टिषोडशपदार्थानामुक्तत्वात् कथं सप्तैवेत्याह। सर्वेषामिति। सर्वेषां सप्तस्वेवांतर्भाव इत्यर्थः। आत्मशरीरेंद्रियार्थ
बुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति द्वादशविधं प्रमेयं। प्रवृत्तिः धर्माधर्मौ रागद्वेषमोहा दोषाः
रागइच्छा द्वेषो मन्युर्मोहः शरीरादावात्मभ्रमः। प्रेत्यभावो मरणं फलं भोगः अपवर्गो मोक्षः स च स्वस्य नानाधिकरणदु
ःखप्रागभावासमानकालीनदुःखध्वंसः प्रयोजनं सुखं दुःखहानिश्च दृष्टांतो महानसादिः प्रामाणिकत्वेनाभ्युपगतो १२
र्थः सिद्धांतः निर्णयो निश्चयः प्रमाणफलं तत्वबुभुत्सोः कथा वादः जयसाधनवती विजिगीषुकथा जल्पः स्वपक्षस्थापन १२
ा कथा वितंडा कथानामनानावक्तृकः पूर्वोत्तरपक्षवाक्यसंदर्भः। अभिप्रतिपादकप्रयुक्तस्य प्रायांतरेणवाक्यस्यार्थां
तरप्रकल्प्य दूषणं छलं। असदुत्तरं जातिः। साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्ति

प्रसंगप्रतिदृष्टांतानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाजा
तयः। वादिनो पराजयहेतुर्निग्रहस्थानं प्रतिज्ञाहानिः प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वंतरमर्थांतरं निरर्थक
मविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपः मतानुज्ञा पर्यनुयोज्योपे
क्षणं निरनुयोज्यानुयोगः। अपसिद्धांतो हेत्वाभासश्च निग्रहस्थानानि शेषं सुगमं। ननु करतलानलसंयोगे स
त्यपि प्रतिबंधके सत्यपि दाहानुत्पत्तेः शक्तिः पदार्थांतरमिति चेन्न। प्रतिबंधकाभावस्य कार्यमात्रे कारण
त्वेन शक्तेरनुपयोगात् कारणत्वस्यैव शक्तिपदार्थत्वात्। ननु मंत्रस्नानादिना कांस्यादौ शुद्धिदर्शनादाधेयशक्तिरंगी
कार्येति चेन्न। स्नानादिसंयोगसमानकालीनास्पृश्यस्पर्शप्रतियोगिकयावदभावसहितस्नानादिसंयोग
ध्वंसस्य शुद्धिपदार्थत्वात्। स्वत्वमपि न पदार्थांतरं यथेष्टविनियोगस्य स्वस्य स्वत्वस्वरूपत्वात् कं च प्रतिग्रहादिलभ्य
त्वमेवेति। अथ विधिर्निरूप्यते। प्रयत्नजनकचिकीर्षाजनकज्ञानविषयो विधिः। तत्प्रतिपादको लिंगादिर्वा।
कृतसाध्ये प्रवृत्त्यदर्शनात्। कृतिसाध्यताज्ञानं प्रवर्तकं न च विषभक्षणादौ प्रवृत्तिप्रसंगः इष्टसाधनताऽलिंग
कृतिसाध्यताज्ञानस्य काम्यस्थले विहितकालजीवित्वनिमित्तकज्ञानं नित्यनैमित्तिकस्थले प्रवर्तकत्वात्।
न चाननुगमः स्वविशेषणवत्ताप्रतिसंधानजन्यत्वस्यानुगतत्वादिति गुरवस्तन्न। लाघवेन कृतिसाध्येष्टसाधन
ताज्ञानस्यैव चिकीर्षाद्वारा प्रयत्नजनकत्वात्। न च निषिद्धस्येष्टसाधनत्वाज्ञानादप्रवृत्तिप्रसंगः। तत्रापि प्रत्यवाय

...रेहारस्य पापक्षयस्य च फलत्वकल्पनात्। तस्मात् कृतिसाध्येष्टसाधनत्वमेव लिंगाद्यर्थः। ननु ज्योति
ष्टोमेन स्वर्गकामो यजेतेत्यत्र लिंङा स्वर्गसाधनं कार्यं प्रतीयते यागस्याशुविनाशिनः कालांतरभाविस्वर्ग
साधनत्वायोग्यत्वात् स्थायि कार्यमपूर्वमेव लिंगाद्यर्थः। कार्यं कृतिसाध्यं कृतेः सविषयत्वात्। विषयाकांक्षा
यां यागो विषयत्वेनान्वेति कस्य कार्यमिति नियोज्याकांक्षायां स्वर्गकामपदं नियोज्यपरतयान्वेति। कार्यबो
द्धा नियोज्यः तेन तेन ज्योतिष्टोमनामकयागविषयकं स्वर्गकामस्य कार्यमिति वाक्यार्थः संपद्यते। वैदिकलिंग
त्वात्। यावज्जीवमग्निहोत्रं जुहुयादित्यादिनित्यवाक्येप्यपूर्वमेव वाच्यं कल्प्यते। आरोग्यकामो भैषज्यपानं कुर्या
दित्यादौ लौकिकलिंगः। क्रियाकार्यलक्षणेति चेन्न। यागस्यायोग्यतानिश्चयाभावेन साधनताप्रतीत्यनं
तरं तन्निर्वाहार्थमवांतरव्यापारतयाऽपूर्वकल्पना। कीर्तनादिना नाशश्रुते— यागध्वंसो व्यापारः लोक
व्युत्पत्तिबलात् क्रियायामेव कृतिसाध्येष्टसाधनत्वं लिंगा बोध्यते इति लिंगत्वेन रूपेण विध्यर्थत्वं आख्या
तत्वेन प्रयत्नार्थकत्वं। पचति पाकं करोतीति विवरणदर्शनात्। किं करोतीति प्रश्ने पचतीत्युत्तराद् आख्यात १३
स्य प्रयत्नार्थकत्वनिश्चयात्। रथो गच्छतीत्यादौ अनुकूलव्यापारे लक्षणा। देवदत्तः पचति देवदत्तेन पच्यते १२
तंडुल इत्यादौ कर्तृकर्मणो नाख्यातार्थत्वं किंतु तद्गतैकत्वादीनामेवेत्यनया रीत्या पादिवल्लानः प्रयजतीत्यादौ
धातोरेव प्रकर्षे शक्तिः उपसर्गाणां मे च द्योतकत्वमेव न तत्र शक्तिरस्ति पदार्थज्ञानस्य परमप्रयोजनं मो

क्षः। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्या श्रवणादीनां साक्षात्कारहेतुत्वबोधनात्। श्रु
त्या देहादिविलक्षणात्मज्ञाने सत्यप्यसंभावनानिवृत्तये युक्त्यनुसंधानरूपमननसाध्यत्वान्मननोपयोगिपदार्थरूपणात्।
शास्त्रस्यापि मोक्षोपयोगः तदनंतरं श्रुत्योपदिष्टयोगविधिना निदिध्यासितेन कृते तदनंतरं देहविलक्षणात्मकसाक्षात्का
रे सति देहादावभिमानरूपमिथ्याज्ञाननाशे सति दोषाभावात् प्रवृत्त्यभावे धर्माधर्मयोरभावाज्जन्माभावे पूर्वधर्माधर्मयोरनुभ
वेन नाशे चरमदुःखध्वंसलक्षणो मोक्षो जायते। ज्ञानमेव मोक्षसाधनं मिथ्याज्ञाननिवृत्तेः ज्ञानसाध्यत्वात् तमेव विदित्वातिमृत्युमेति
नान्यः पंथा विद्यतेऽयनायेति। साधनांतरनिषेधाच्च। ननु यं शैवाः समुपासते शिव इति ब्रह्मेति वेदांतिनो बौद्धा बुद्ध इति प्रमा
णपटवः कर्तेति नैयायिकाः। तस्मान्निहेतुविज्ञानं कर्म चोक्तं महामुने इति कर्मणोपि मोक्षसाधनत्वस्मरणात् ज्ञानकर्मणोः समुच्च
य इति चेन्न। नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयं। ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत्। अभ्यासात् पक्वविज्ञानं कैवल्यं
लभते नर इत्यादिना कर्मणो ज्ञानसाधनत्वप्रतिपादनात् ज्ञानद्वारैव कर्म मोक्षसाधनं न साक्षात् तस्मात् पदार्थज्ञानान्मोक्षः पर १५
मप्रयोजनमिति सर्वं रमणीयं॥ ॥इति श्रीमदन्नंभट्टोपाध्यायकृततर्कसंग्रहदीपिका समाप्ता॥ ॥संवत् १७८५ कार्तिक
शुदि १ भौमे लिखितं। नाणजीकेन॥ ॥ श्री ॥ ७ ॥ श्री ॥ ७ ॥ श्री ॥ ७ ॥ श्री ॥ ७ ॥
शुभमस्तु॥ ॥त्रवाडी नाणजीनूं पुस्तक॥ ॥

तर्कसंग्रहदीपिकापत्र१५